# संस्कृत-वार्ता:

**दिनाङ्क:-08/10/2023**
**प्रात : 06:55**

**इजराइल हमास्**

हमास् इत्यातङ्कवादिसंघटनेन इजरायल्-देशे आक्रमणं कृतम्। इजरायलदेशस्य रक्षामन्त्रालयेन अपि आतङ्किनां स्वदेशे प्रवेशस्य पुष्टिः कृता। एतदतिरिक्तं इजरायल्-देशे शतशः क्षेपणी-प्रहारः अपि जातः। इजरायलसैन्यदलेन घोषितं यत् गाजाक्षेत्रतः इजरायल्-देशे पेलेस्टिन्देशस्य अनेके उग्रवादिनः प्रविष्टाः सन्ति, तावत् सीमाक्षेत्रेषु निवसतः जनान् उद्दिश्य इज्रायलेदेशस्य सैन्येन तेभ्यः गृहेषु एव स्थातुं निर्देशः दत्तः, आक्रमणस्य प्रतीकारे इजरायल्-देशेन गाजा-क्षेत्रे युद्धस्य घोषणा कृता अस्ति। अपि च सूच्यते यत् तत्र इज्रायलदेशे, विमानस्थानकानि, अन्यानि अपि सैन्यस्थात्रादीनि 5000 क्षेपणीभिः लक्ष्यीकृतानि अभवन्। अत एव इजरायलदेशस्य रक्षामन्त्री आरक्षित-सैन्यदलानि अपि सज्जीकारितवान् अस्ति। इज्रायलसैन्येन गाजा-क्षेत्रे प्रबलं योद्धृविमानाक्रमणं विहितम् इति संसूच्यते। वर्तमानां विषमां स्थितिं समीक्ष्य बेन्जामिन नेतन्याहू इत्येतेन तत्र इज्रायलदेशे आपत्कालिकम् उपवेशनम् आहूय युद्धस्थितेः घोषणा कृता। जगतः विविधैः देशैः उत्पादिताम् ईदृशीम् आतङ्कस्थितिम् आलक्ष्य हमास् इत्यस्य भर्त्सना कृता।प्रधानमनत्रिणा नरेन्द्रमोदिना आक्रमणमिदं भर्त्सितम्। प्रोक्तं च अस्यां स्थितौ भारतं भारतस्य संवेदना च प्रभावित-जनान् प्रति विद्यते। एकस्मिन् संचारमाध्यमे श्री मोदी अलिखत् यत् वृत्तान्तमिदं श्रुत्वा आघातो जातः। भारतं च सर्वविधया इज्रेलदेशेन सह विद्यते

**अमितशाह:**

केंद्रीय गृहमंत्री अमितशाह: अवदीत् यत् देशात् आतंकवादस्य समूल नाशस्य समय: आगत:। स: अवदत् यत् आतंकवादस्य निवारणाय वयम् शून्यसहिष्णुताया: नीत्या सह अग्रे गमिष्याम:। गृहमंत्री गतदिने देहरादून नगरे नवचत्वारिंशत् अखिल-भारतीय-आरक्षिबल-विज्ञान-कांग्रेस मंचं सम्बोधयति स्म।

## सिक्किम जलप्लाव

सिक्किम-राज्ये सहसा समागतेन जलप्लावनेन संजातां हानिम् आकलयितुम् अन्त-र्मन्त्रालयीया समितिः तत्र राज्यं गमिष्यति। केन्द्रीय-गृहराज्य-मन्त्री अजयकुमारमिश्रः अस्यां समितौ कृषिः परिवहन-राजमार्ग-जलशक्ति-ऊर्जा-वित्त-मन्त्रालयानाम् अधिकारिणः सम्मिलिताः सन्ति। प्रधानमन्त्री गृहमन्त्री च सिक्किम-मुख्यमन्त्रिणा सह सततं सम्पर्के स्तः

**अफगानिस्तान-भूकम्प:**

अफगानिस्तान देशे प्रबल भूकम्पेन न्यूनातिन्यूनं विंशत्यधिकैकशतम् जना: मृता: सहस्राधिकाश्च आहता:। पश्चिमदिशि हेरात् नगरात् चत्वारिंशत् किलोमीटर दूरे षट्-दशमलव-त्रय: तीव्रताया: भूकम्प: आगत:। येन अनेकानि भवनानि पतितानि शताधिक जना: प्रध्वंसभवने निमग्ना: जाता:।

**एशियाई प्रतिस्पर्धा**

एशियाई-क्रीडासु  भारतेन चीनस्य हांगचोउनगरे साम्प्रतं यावत् सप्ताधिकैकशतं पदकानि विजितानि। पदकेषु अष्टाविंशति: स्वर्णपदकानि, अष्टत्रिंशत्  रजतपदकानि, एकचत्वारिंशत्  कांस्यपदकानि सन्ति। इदं प्रथमवारं अस्ति यदा भारतेन एतादृशं कीर्तिमानं संस्थापितम्। अवधेयं वर्तते यत् इदं केवलं द्वितीय वारमस्ति यत् यदा भारतं त्रिसूषु प्रमुखक्रीडासु ओलम्पिक-राष्ट्रमण्डल-एशियाई-क्रीडासु शताधिकानि पद्कानि विजितानि। दशाधिक द्विसहस्रतमे वर्षे नवदिल्ल्यां जातायां राष्ट्रमण्डल क्रीडायां एकाधिकैकशतं पदकानि विजितानि आसीत्।

**।। इति वार्ता: ।।**